कर्परांशः, पुं, (कर्परस्य अंशः।) शर्करा। इति शब्दरत्नावली। खोलाकुचि इति भाषा॥

कर्परालः, पुं, (कर्पर इवालति पर्य्याप्नोति। कर्पर+अल्+अच्। कर्परं अलति इति केचित् अल+कर्म्मण्यण्।) कन्दरालः। पर्व्वतजातपीलुवृक्षः। इत्यमरटीकायां रमानाथः। आखरोट् इति भाषा॥

कर्परिकातुत्थं, क्ली, (कर्परैव इति स्वार्थे कन् तत ष्टाप् अत इत्वं कर्परिकेव तुत्थम्।) तुत्थविशेषः। कर्परी। इति हेमचन्द्रः॥

कर्परी, स्त्री, (कृप्+बाहुलकात् अरट्। लत्वाभावश्च। टित्वात् ङीप्। केचित्तु कृपधातोररन् प्रत्ययेन निष्पादितोऽयं तन्मते गौरादित्वात् ङीष्।) काथोद्भवं तुत्थम्। दारुहरिद्रार काथेर तुतिया इति भाषा। तत्पर्य्यायः। दार्व्विका २। इत्यमरः। २।९।१०१॥ तुत्थाञ्जनम्। इति तट्टीकायां स्वामी॥

कर्पासः, पुं स्त्री, ("कृपः पासः"। उणां ५। ४५ इति कृपधातोः पासः।) कार्पासः। इत्यमरटीका। कापास् इति भाषा॥

कर्पासी, स्त्री, (कर्पास इति जातित्वात् गौरादित्वात् वा ङीष्।) कार्पासी। इति भरतः॥ कापासगाछ इति भाषा॥

कर्पूरः, पुं, क्ली, (कृप्+"खर्ज्जूरादित्वात्" उणां ४।९०। इति ऊरः।) स्वनामख्यातसुगन्धिद्रव्यम्। कापुर इति पारस्य भाषा। कपूर इति हिन्दी भाषा। (यथा,—राजेन्द्रकर्णपूरे ३३।
"कर्पूरैरिव पारदैरिव सुधास्यन्दैरिवाज्ञाविते जाते हन्त! दिवापि देव! ककुभां गर्भे भवत्कीर्त्तिभिः"॥) तत्पर्य्यायः। घनसारः २ चन्द्रसंज्ञः ३ सिताभ्रः ४ हिमवालुका ५। इत्यमरः। २।६। १३०॥ सिताभः ६। इति तट्टीका॥ घनसारकः ७ सितकरः ८ शीतः ९ शशाङ्कः १० शिला ११ शीतांशुः १२ हिमवालुकः १३ हिमकरः १४ शीतप्रभः १५ शाम्भवः १६ शुभ्रांशुः १७ स्फटिकाभ्रः १८ कारमिहिका १९ ताराभ्रः २० चन्द्रार्कः २१ चन्द्रः २२ लोकतुषारः २३ गौरः २४ कुमुदः २५ इन्दुः २६ हिमाह्वयः २७ चन्द्रभस्म २८ वेधकः २९ रेणुसारकः ३०। इति शब्दरत्नावली॥ अस्य गुणाः। शिशिरत्वम्। तिक्तत्वम्। कटुत्वम्। श्लेष्मकफपित्तदृष्याविदाहकण्ठस्यदोषोष्णरोगनाशित्वञ्च॥
"कर्पूरो नूतनस्तिक्तः स्निग्धश्चोष्णाश्चदाहदः।
चिरस्थो दाहशोषघ्नः स धौतः शुभ्रकृत्परः"।
इति राजनिर्घण्टः॥
अपि च। पाके शीतलत्वम्। चक्षुर्हितकारित्वम्। पक्वकर्पूरादपक्वस्याधिकगुणत्वञ्च। इति राजवल्लभः॥ तद्भेदा यथा। पोतासः १ भीमसेनः २ सितकरः ३ शङ्करावाससंज्ञः ४ पांशुः ५ पिञ्जः ६ अब्दसारः ७ हिमवालुकः ८ जूतिका ९ तुषारः १० हिमः ११ शीतलः १२ पत्रिकाख्यः १३। इति राजनिर्घण्टः॥

(तत्रादौ कर्पूरस्य नाम गुणाश्च।
"कर्पूरः शीतलो वृष्यश्चक्षुष्यो लेखनो लघुः।
सुरभिर्मधुरस्तिक्तः कफपित्तविषापहः।
दाहतृष्णास्यवैरस्यमेदो दौर्गन्ध्यनाशनः॥
कर्पूरोद्विविधः प्रोक्तः पक्वापक्वप्रभेदतः।
पक्वात् कर्पूरतः प्राहुरपक्वं गुणवत्तरम्"॥
अथ चीनाककर्पूरः। चीनेकर्पूर इति भाषा।
"चीनाकसंज्ञः कर्पूरः कफक्षयकरः स्मृतः।
कुष्ठकण्डूवमिहरस्तथा तिक्तरसश्च सः"॥
इति भावप्रकाशस्य पूर्व्वखण्डे १ म भागे॥
"सतिक्तः सुरभिः शीतः कर्पूरो लघुलेखनः।
तृष्णायां मुखशोषे च वैरस्ये चापि पूजितः"॥
इति सुश्रुते सूत्रस्थाने ४६ अध्याये॥)

कर्पूरकः, पुं, (कर्पूर इव कायति प्रकाशते शोभते वा। कर्पूर+कै+क।) कर्च्चुरकः। कर्चूरकः। इति शब्दचन्द्रिका॥

कर्पूरतिलकः, पुं, (कर्पूर इव शुक्लं तिलकं ललाट् चिह्नं यस्य।) स्वनामख्यातो हस्ती। यथा हितोपदेशे १। ३४६।
"अस्ति ब्रह्मारण्ये कर्पूरतिलको नाम हस्ती"।)
स्त्री, उमासखिभेदः। जया। इति शब्दमाला॥

कर्पूरतैलं, क्ली, (कर्पूराज्जातं तैलं स्नेहः। कर्पूरस्य तैलमिव स्नेहो वा।) कर्पूरस्नेहः। तत्पर्य्यायः। हिमतैलम् २ सुधांशुतैलम् ३ शीतांशुतैलम् ४ तुहिनांशुतैलम् ५ सितांशुतैलम् ६। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। कफवातामयनाशित्वम्। दन्तदार्ढ्यपित्तकारित्वञ्च। इति राजनिर्घण्टः॥

कर्पूरनालिका, स्त्री, मक्कान्नविशेषः। कर्पूरनाड़ि इति नेपाल्याभाषा इति च ख्याता। यथा भावप्रकाशः।
"घृताख्यया समितया कृत्वा सम्पुटं ततः।
लवङ्गोषणकर्पूरयुतया सितयान्वितम्॥
पचेदाज्येन सिद्धैषा ज्ञेया कर्पूरनालिका।
संयावसदृशी ज्ञेया गुणैः कर्पूरनालिका"॥

कर्पूरमणिः, पुं, (कर्पूरवर्णो मणिः।) पाषाणभेदः।
"कर्पूरमणिनामायं युक्त्या वातादिदोषनुत्"॥
इति राजनिर्घण्टः॥

कर्व्वरः, पुं, (कीर्य्यते क्षिप्यते इति। कॄ+विच्। कर्। फल्यते इति फलः प्रतिबिम्बः। फल+कः। लस्य रः। कीर्य्यमाणः फलः प्रतिबिम्बः यत्र। दर्पणे हि मुखादीनां प्रतिबिम्बपतनात् तथा बोध्यते।) दर्पणः। इति जटाधरः॥

कर्ब्ब गतौ। इति कविकल्पद्रुमः। (भ्वां-परं-सकं-सेट्।) रेफोपधः। कर्ब्बति। इति दुर्गादासः॥

कर्ब्बुदारः, पुं, (कर्ब्बुरिव कर्ब्बुः सन् वा श्लेष्मानं मलं वा दारयतीति। कर्ब्बु+दृ+णिच्+अच्।) कोविदारवृक्षः। इति शब्दमाला॥ श्वेतकाञ्चनः। अस्य गुणौ। ग्राहित्वम्। रक्तपित्तरोगे विशेषेण पथ्यत्वञ्च। इति राजवल्लभः॥
("शणस्य कोविदारस्य कर्ब्बुदारस्य शाल्मलेः।
पुष्पं ग्राहि प्रशस्तस्य रक्तपित्ते विशेषतः"॥
इति चरके सूत्रस्थाने। २७ अध्याये॥)
नीलझिण्टी। इति शब्दचन्द्रिका॥

कर्ब्बुदारकः, पुं, (कर्ब्बुदारवत् कायति। कै+कः। यद्वा कर्ब्बुः सन् कर्ब्बुरिव वा श्लेष्मानं कफं दारयति। दृ+णिच्+ण्वुल्।) श्लेष्मान्तकवृक्षः। इति राजनिर्घण्टः॥

कर्ब्बुरं, क्ली, (कर्ब्बति गर्व्वत्यस्मात् यस्मिन् सति वा गर्व्वो भवति कर्व्वत्यनेन वा। कर्ब्ब दर्पे इति "मद्गुरादयश्च" उणां १। ४२। इति उरच्।) स्वर्णम्। धुस्तूरवृक्षः। इत्यमरः। २।९।९४॥ जलम्। इति मेदिनी॥

कर्ब्बुरः, पुं, (कर्ब्बति हिनस्ति जीवम्। कर्ब्ब हिंसायां+"मद्गुरादयश्च"। उणां। १। ४२। इति उरच्।) राक्षसः। ("कर्ब्बुरः श्वेतरक्षसोः" उज्ज्वलः। १। ४२। कर्ब्बति नानावर्णतां गच्छति। कर्ब्ब गतौ+उरच्। उणां १। ४२।) नानावर्णः। तत्पर्य्यायः। चित्रम् २ किर्म्मीरः ३ कल्माषः ४ शवलः ५ एतः ६॥ (यथा कुमारे। ४। २७।
"इति चैनमुवाच दुःखिता
सुहृदः पश्य वसन्त! किं स्थितम्।
तदिदं कणशो विकीर्य्यते
पवनैर्भस्म कपोतकर्ब्बुरम्"॥)
त्रिलिङ्गे तु वाच्यलिङ्गः। इत्यमरः।१।६।१७॥ शटी। इत्यमरटीका॥ पापम्। इति मेदिनी॥ नदीनिष्पावधान्यम्। इति राजनिर्घण्टः॥

कर्ब्बुरफलः, पुं, (कर्ब्बुरं चित्रवर्णं फलं यस्य।) साकुरुण्डवृक्षः। इति राजनिर्घण्टः॥

कर्ब्बुरा, स्त्री, (कर्ब्बुर+टाप्।) कृष्णवृन्तावृक्षः। इति मेदिनी॥ पारल इति भाषा॥ बर्व्वरा। इति जटाधरः॥ बावुइ तुलसी इति भाषा॥ (जलौकोजातिविशेषः।
"वर्म्मिमत्स्यवदायता छिन्नोन्नतकुक्षिः कर्ब्बुरा"॥
इति सुश्रुते। १३ अध्याये॥)

कर्ब्बुरी, स्त्री, (कर्ब्बुर+गौरादित्वात् ङीष्।) दुर्गा। इति त्रिकाण्डशेषः॥

कर्ब्बूरं, क्ली, (कर्ब्बति गर्व्वं प्राप्नोति यस्मात् कर्ब्ब दर्पे गतौ वा खर्ज्जूरादित्वात् ऊरः। उणां ४। ९०। पृषोदरात् दीर्घो वा।) स्वर्णम्। इति मेदिनी॥ हरितालम्। इति त्रिकाण्डशेषः॥

कर्ब्बूरः, पुं, (कर्ब्बति गर्व्वति हिनस्ति वा। कर्ब्ब+ऊरः।) शटी। इत्यमरः। २।९।९४॥ राक्षसः। इत्युणादिकोषः। द्राविड़कः। इति शब्दरत्नावली। काँचहलुदि इति भाषा॥

कर्ब्बूरकः, पुं, (कर्ब्बूर+स्वार्थे कन्।) हरिद्राभवृक्षः। काँचहलुदि इति ख्यातः। इति भरतः॥ कालहरिद्रा। इति सारसुन्दरी॥ कर्पूरहरिद्रा। इति सारमञ्जरी॥ काकवल्लभः। इति भगीरथः॥ द्राविड़ा हरिद्रेति ख्याता। इति टीकासर्व्वस्वम्॥ हरिद्राभकचोरा इति ख्याता। इति मधुमाधवी॥ तत्पर्य्यायः। द्राविड़कः २ काल्यकः ३ वेधमुख्यकः ४। इत्यमरः। २। ४। १२५॥ काल्यकः ५ इति टीका सर्व्वस्वम्॥

कर्म्म, [न्] क्ली, (यत्क्रियते तत्। कृ+मनिन्। कर्त्तुः क्रियया यदाप्यते तत्। क्रियाव्याप्यं कर्म्मेति